संस्कृत.

क्र. नं. ९३९

५।१।६।९

पौरोहित्यिक.

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

मृत्युंजयजपप्रयोग.

(1)

श्रीगणेशाय नमः ॥ अद्येत्यादि० स्यार्थं अमुकशर्मणः यजमानस्य श्री
नेश्वरप्रसादसिद्धिद्वारा सकलाभीष्टसिध्यर्थं सहस्त्रसंख्याकमृत्युं
जयजपमहं करिष्ये ॥ निर्विघ्नार्थं गणपतिस्मरणं करिष्ये । अस्य श्री
त्र्यंबकमृत्युंजयमालामंत्रस्य वसिष्ठऋषिः । अनुष्टुप् छंदः । मृत्युं
जयसदाशिवरुद्रो देवता ॥ यजमानस्य अभीष्टसिध्यर्थे जपे विनियो
गः ॥ वसिष्ठऋषये नमः शिरसि । अनुष्टुप् छंदसे नमः मुखे । मृत्युंज
यसदाशिवरुद्रो देवतायै नमः हृदये । ह्रीं बीजाय नमः गुह्ये ॥ श्रीं शक्तये
नमः पादयोः ॥ त्र्यंबकं ॐ नमो भगवते रुद्राय अंगुष्ठाभ्यां नमः । यजामहे ।
ॐ ह्रौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यंबकं० मृ० तात् ॐ स्वः भुवः भूः ॐ सः जूं ह्रौं ॐ ॥ हू ५२ ॥ ५

(२)

मृ०सं०जप

ॐ नमो भगवते रुद्राय तर्जनीभ्यां नमः। सुगंधिं पुष्टिवर्धनं। ॐ
नमो भगवते रुद्राय मध्यमाभ्यां० उर्वारुकमिव बंधनात्। ॐ
नमो भगवते रुद्राय अनामिकाभ्यां० मृत्योर्मुक्षीय। ॐ नमो भ
गवते रु० य कनिष्ठिकाभ्यां० मामृतात्। ॐ नमो भगवते रुद्राय
करतलकरपृष्ठाभ्यां० हृदयादि० त्र्यंबकं। ~~हृदयाय नमः~~। ॐ नमो०
य हृदयाय० यजामहे। ॐ नमो भ० य शिरसे स्वाहा।। सुगंधिं पुष्टि
वर्धनं। ॐ नमो भ० य शिखा० उर्वारुकमिव बंधनात्। ॐ नमो० य
कवचाय हुं। मृत्योर्मुक्षीय। ॐ नमो भ० य नेत्रत्रयाय वौषट्। मामृ

(2A)

तात्॥ ॐ नमो भ० य अस्त्राय फट्॥ त्र्यंबकं ॐ नमो भगवते रुद्राय शूल
पाणये स्वाहा। हृदयाय० यजामहे। ॐ नमो भ० य अमृतां मूर्तये मां जी
वय शिरसे स्वाहा॥ सुगंधिं पुष्टिवर्धनं। ॐ नमो भ० य चंद्र शिरसे जटि
ने स्वाहा॥ शिखायै वषट्॥ उर्वारुकमिव बंधनात्। ॐ नमो भ० य त्रिपु
रांतकाय ह्रां ह्रीं कवचाय हुं॥ मृत्योर्मुक्षीय। ॐ नमो भग० य त्रिलोचना
य ऋग्यजुःसामाथर्वणाय नेत्रत्रयाय वौषट्॥ मामृतात्। ॐ नमो भ०
य अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष यजमानं रक्ष रक्ष स्फुर स्फु
र प्रस्फुर प्रस्फुर अघोर घोरतर तनुरूप चट चट प्रचट प्रचट कः

" Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(3)

मृत्युंजय·
क वमवम बंध बंध घातय घातय हुं फट् ॥ अस्त्राय फट् भूर्भुवः
स्वरोम् मूइतिदिक्बंधः ॥ हस्तांभोजयुगस्थकुंभयुगकादुध्हृत्य तोयं
शिरः सिंचंतं करयोर्युगेन दधतं स्वांके सकुंभौ करौ ॥ अक्षस्रग्मृग ह
स्तमंबुजगतं मूर्धस्थकुंभस्रुतपीयूषोन्ततनुं भजे सगिरिजं त्र्यक्षं च
मृत्युंजयं ॥ लं पृथिव्यात्मने गंधं परिकल्पयामि । हं आकाशात्मने
पुष्पं प॰ मि । यं वाय्वात्मने धूपं प॰ । रं अग्न्यात्मने दीपं प॰ मि । वं अमृतात्मने
दीपं प॰ मि ॥ ३ ॥ मुद्राकारिका ॥ मुष्टिसारंगशक्त्याख्या लिंग पंचमुखाभिधाः ॥
मुद्राप्रदर्श्य प्रजपेल्लक्षं तस्य दशांशतः ॥ दशद्रव्यैः प्रजुहुयात् तानि बिल्वफला व
तिलाः ॥ पायसं सर्पिषा दुग्धं दधि दूर्वाश्च सप्तमी । वटपालाशखदिरास्समिधो मधुराप्लुताः ॥ ७ ॥

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com